दशाश्वः, पुं, (दश अश्वा रथे यस्य ।) चन्द्रः । इति शब्दरत्नावली ॥ (यथा, ग्रहयागतत्त्वे सोमध्याने ।

"दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतम् ।
जलप्रत्यधिदैवञ्च सूर्य्याश्वमाहरेत्तथा ॥"

दक्षाकोर्द्दशमपुत्त्रः । यथा, महाभारते । १३ । २ । ६ ।

"दशमस्तस्य पुत्त्रोऽभूद् दशाश्वो नाम भारत ॥")

दशास्यः, पुं, (दश आस्यानि वदनानि यस्य ।) रावणः । इति भूरिप्रयोगः ॥ (यथा, रसिकरञ्जने । ५ ।

"अकलियुगमखर्व्वंसर्व्वमत्र ह्रदं
अधरदशपदम्नो यतः कुटुम्बी ।
मम रुचिरिह लक्ष्मयायतेन
प्रभवति शम्भे दशास्यमर्द्दनेन ॥")

दशास्यजित्, पुं, (दशास्यं जयतीति । दशास्य+जि+क्विप् । तुगागमश्च ।) श्रीरामः । इति भूरिप्रयोगः ॥

दशेन्धनः, पुं, (दशा वर्त्तिका इन्धनं काष्ठमिव यस्य ।) प्रदीपः । इति त्रिकाण्डशेषः ॥

दशेरः, पुं, (दशतीति । दन्श+"यतिकठिकुठिगडिगुडिदंशिभ्य एरक् ।" उणां । १ । ५८ । इति एरक् ।) हिंस्रः । इत्युणादिकोषः ॥

दशेरकः, पुं, (दशति दुःखं ददातीति । दन्श+एरक् । ततः कन् ।) मरुदेशः । तद्देशस्थे, पुंभूम्नि । इति हेमचन्द्रः ॥ (यथा, महाभारते । ७ । ६ । १६ ।

"आवन्त्यान् दाक्षिणात्यांश्च पार्व्वतीयान् दशेरकान् ॥")

दशेरकः, पुं, (दशति दुःखानि ददातीति । दश+बाहुलकात् एरक् ततः स्वार्थे कन् ।) मरुदेशः । इति भूरिप्रयोगः ॥

दस, द क भासि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) द क, दंसयति दंसति । भासि दीप्तौ । इति दुर्गादासः ॥

दस, इ ङ क दृशौ । दंशे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) दशिरिति पाणिनेरौणादिकक्विप्रत्यये रूपम् । इ ङ क, दंसयते फलं शिशुः पश्यति दशति वेत्यर्थः । भट्टमल्लमते दंश दह सम्राहः । इति दुर्गादासः ॥

दस, य उ इर् उत्क्षेपे । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) य, दस्यति धूलिं वायुः । उ, दसित्वा दस्त्वा । इर्, अदसत् अदासीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

दस्मः, पुं, (दस्यति उत्क्षिपति दक्षिणादिकमिति । दस+"इषियुधीन्धिदसिश्याधूसूभ्यो मक् ।" उणां । १ । १४४ । इति मक् ।) यजमानः । चौरः । हुताशनः । इति मेदिनी । मे, १५ ॥ खलः । इति शब्दरत्नावली ॥ (त्रि, उपक्षेपकः । यथा, ऋग्वेदे । १ । १४८ । ४ ।

"पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ॥"

"दस्म उपक्षपयिताग्निः ।" इति तद्भाष्ये सायनः ॥ दर्शनीयः । यथा, ऋग्वेदे । १ । ७१ । ३ ।

"तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्ममारीः ॥"

"दस्मं दर्शनीयं तमग्निमारीर्गच्छन्त्यः ।" इति तद्भाष्ये सायनः ॥)

दस्युः, पुं, (दस्यति परस्वान् नाशयतीति । दस+"यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणां । ३ । २० । इति युच् । बाहुलकादनादेशाभावः ।) चौरः । (यथा, मनुः । ७ । १४३ ।

"विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः ।
सम्पश्यतः सभृत्यस्य मृतः स न तु जीवति ॥")

रिपुः । (यथा, ऋग्वेदे । २ । १२ । १० ।

"यः शर्द्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥"

"दस्योरुपक्षपयितुः शत्रोर्हन्ता घातकः ॥" इति तद्भाष्ये सायनः ॥) महासाहसिकः । इति शब्दरत्नावली ॥ असुरः । यथा, तत्रैव । ६ । ४७ । २ ।

"हतानीदस्य कर्त्ता चेतन्ते दस्युतर्हणा ॥"

"दस्युतर्हणा दस्यूनामसुराणां तर्हणा ।" इति तद्भाष्ये सायनः ॥ कर्म्मवर्ज्जिते, त्रि । यथा, ऋग्वेदे । ६ । २४ । ८ ।

"न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ॥"

"शर्धते उत्सहमानाय दस्युजूताय कर्म्मवर्ज्जितैः प्रेरिताय ।" इति तद्भाष्ये सायनः ॥)

दस्रं, क्ली, (दंसयते हृष्यादीन् दशतीति । दसि दंशे+"स्फायितञ्चिवञ्चिशकीति ।" उणां । २ । १३ । इति रक् ।) शिशिरम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दस्रः, पुं, (दस्यति उत्क्षिपति पांशूनिति । दस उत्क्षेपे+"स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् ।) खरः । (दस्यति रोगान् क्षिपतीति ।) अश्विनीसुतः । इति मेदिनी । रे, ४२ ॥ (यथा, हरिवंशे । ९ । ५३ ।

"नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनीसुतौ ॥"

दर्शनीये, त्रि । यथा, ऋग्वेदे । ६ । ६९ । ७ ।

"इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ॥"

"दस्रा हे दर्शनीयाविन्द्राविष्णू ॥" इति तद्भाष्ये सायनः ॥)

दस्रौ, पुं, (दस्यतः क्षिपतो रोगानिति । दस+"स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् ।) अश्विनौ । इत्यमरः । १ । १ । ५४ ॥ द्विवचनान्तोऽयं शब्दः ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"दक्षादधीत्य दस्रौ वितनुतः संहितां स्वयाम् ।
सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् ॥
"देवासुररणे देवा दैत्यैर्ये सन्तताः क्षताः ।
अक्षतास्ते क्षताः सद्यो दस्राभ्यामद्भुतं महत् ॥
वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः ।
सोमान्निपतितश्चन्द्रस्ताभ्यामेव सुखीकृतः ॥")

दस्रदेवता, स्त्री, (दस्रौ अश्विनौ अधिष्ठातृदेवते यस्याः ।) अश्विनीनक्षत्रम् । इति हेमचन्द्रः । २ । २२ ॥

दस्रसूः, स्त्री, (दस्रौ अश्विनौ सूते इति । सू प्रसवे+क्विप् ।) संज्ञा । सा सूर्य्यपत्नी अश्विनीकुमारमाता च । इति त्रिकाण्डशेषः ॥

दह, औ दाहे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) औ, अधाक्षीत् । दाहो भस्मीकरणम् । दहत्यग्निः काष्ठम् । इति दुर्गादासः ॥

दह, इ क दीप्तौ । दाहे । इति कविकल्पद्रुमः ॥ (चुरां-परं-दीप्तौ अकं-दाहे सकं-सेट् ।) इ क, दंहयति । इति दुर्गादासः ॥

दहनं, क्ली, (दह दाहे+भावे ल्युट् ।) दाहः । भस्मीकरणम् । पोड़ान इति भाषा ॥ (यथा, रघुः । ८ । २० ।

"इतरो दहने स्वकर्म्मणां
ववृते ज्ञानमयेन वह्निना ॥")

दहनः, पुं, (दहतीति । दह दाहे+ल्युः ।) अग्निः । (यथा, आर्य्यासप्तशत्याम् । ३०४ ।

"धूमैरश्रु निपातय दह शिखया दहन ! मलिनयाङ्गारैः ।
जागरयिष्यति दुर्गतगृहिणी त्वां तदपि शिशिरनिशि ॥"

तृतीयसंख्या । यथा, सूर्य्यसिद्धान्ते । १२ । ८५ ।

"खत्रयाब्धिदहनाः कक्षा तु हिमदीधितेः ॥"

कृत्तिकानक्षत्रस्य अधिष्ठातृदेवत्वात् कृत्तिकानक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।

"दहनविधिशताख्या मैत्रभं सौम्यवारे ॥")

चित्रकः । भल्लातकः । दुष्टचेतसि, त्रि । इति मेदिनी । ने, ७५ ॥ (दह्यते कामाग्निना इति, दह+ल्युट् ।) कपोतः । इति राजनिर्घण्टः ॥ (रुद्रविशेषः । यथा, महाभारते । १ । ६६ । ३ ।

"दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः ।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥"

स्कन्दस्यानुचरविशेषः । यथा तत्रैव । ९ । ४५ । ३३ ।

"दहतिं दहनश्चैव प्रचण्डौ वीर्य्यसम्मतौ ।
अंशोऽप्यनुचरान् पञ्च ददौ स्कन्दाय धीमते ॥"

दाहकमात्रे, त्रि । यथा, भागवते । ८ । ७ । २१ ।

"त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥")

दहनकेतनं, क्ली, (दहनस्य केतनं ध्वज इव ।) धूमः । इति हेमचन्द्रः । ४ । १७ ॥

दहनप्रिया, स्त्री, (दहनस्याग्नेः प्रिया ।) स्वाहा । इति त्रिकाण्डशेषः ॥

दहनागुरु, क्ली, (दहनाय अगुरु ।) दाहागुरु । इति राजनिर्घण्टः ॥

दहनारातिः पुं, (दहनस्याग्नेः अरातिः शत्रुः ।) जलम् । इति राजनिर्घण्टः ॥

दहनीयः, त्रि, (दह्यते इति । दह+कर्म्मणि अनीयर् ।) दाह्यः । दहनार्हः ॥

दहनोपलः, पुं, (दहनाय वह्न्युत्पादनाय च उपलः प्रस्तरखण्डः ।) सूर्य्यकान्तमणिः । इति हेमचन्द्रः । ४ । १३३ ॥ दहनोपमोऽपि पाठः ॥